C·S (M) 09

№ 000103

D-DTN-J-TLA

# SANSKRIT

## Paper I

## (Literature)

*Time Allowed : Three Hours*

*Maximum Marks : 300*

---

***INSTRUCTIONS***

***Candidates should attempt questions no. 1 and 5 which are compulsory, and any THREE of the remaining questions, selecting at least ONE question from each Section.***

***The number of marks carried by each question is indicated at the end of the question.***

***Questions no. 1, 5 and 8 must be answered in Sanskrit and the remaining questions must be answered either in Sanskrit or in the medium of examination specified in the Admission Certificate issued to you.***

***Answers written in Sanskrit must be in Devanāgarī script.***

---

### SECTION A

1. (a) अधोलिखितानां संस्कृतेन समाधानं कार्यम् । 3

(i) अट् — प्रत्याहारे के वर्णाः ?

(ii) का संयोग-संज्ञा ?

(iii) शिष्याः शास्त्रं पठन्ति । — वाच्यपरिवर्तनं क्रियताम् ।

(b) अधोलिखितानां पदानां सुरगिरा सूत्रोल्लेखपूर्वकं सन्धिविच्छेदः कार्यः । 12

मनस्यवधार्य, गङ्गोदकम्, सुमती रामः, तांश्च ।

(c) अधोदत्तेषु वाक्येषु रेखाङ्कितपदानां विभक्तिप्रयोगस्य याथार्थ्यं सूत्रोल्लेखपूर्वकं विचार्यम् । 25

(i) अधीती <u>व्याकरणे</u> ।

(ii) <u>आसनात्</u> अधीयते विद्यार्थिनः ।

(iii) रोगी <u>शय्याम्</u> अधिशेते ।

(iv) <u>तेभ्य</u> एवं वक्तव्यम् ।

(v) <u>प्रसादाय</u> स्पृहयन्ति भक्ताः ।

(d) समासो विधीयताम्; समासनाम चोल्लेख्यम् । 20

(i) अहश्च निशा च ।

(ii) कुण्डलाय हिरण्यम् ।

(iii) बलमनतिक्रम्य ।

(iv) श्रीचैतन्यश्च नित्यानन्दश्च ।

(v) सर्पेण दष्टः ।

2. भाषाविज्ञानदृष्ट्या वैदिकभाषाया वैशिष्ट्यानि विशद्यन्ताम् । 60

3. वाक्यं रसात्मकं काव्यम् — विस्तरेण व्याख्येयमिदं लक्षणम् । 60

4. रामायणकथामवलम्ब्य रचितानि पञ्च नाटकानि नामत उल्लिख्य तेषां काव्यमाहात्म्यं प्रतिपाद्यताम् । 60

## SECTION B

5. Write an essay in Sanskrit as indicated in the instructions in Sanskrit below :

न्यूनतः सार्धशतत्रय-(350)-परिमितैः शब्दैः, सुरगिरा विरच्यतामेको निबन्धः, अधोदत्तेषु विषयेषु एकतमं गृहीत्वा, नागराक्षरैश्च । *60*

(a) पर्यावरणदूषणं तत्प्रतीकारोपायाश्च ।

(b) दण्डस्य हि भयात्सर्वं जगद् भोगाय कल्प्यते ।

(c) जनशिक्षायाः प्रयोगोपायाः ।

6. प्राचीनकालीन-वर्णाश्रमव्यवस्थितेः समकालिकं पर्यालोचनं संपादनीयम् । *60*

7. भारतीयं प्राचीनं वास्तुशास्त्रमधिकृत्य विचारविमर्शः क्रियताम् । *60*

8. अधस्तात्प्राप्तं ग्रन्थांशं सम्यगवधार्य सरलसुरगिरा प्रश्नानां समाधानं कर्तव्यम् ।

Read the following passage carefully and answer the questions that follow in Sanskrit. *10×6=60*

द्रोणेन चक्रव्यूहे निर्मिते युधिष्ठिरश्चिन्तया व्याकुलो जातः । अर्जुनेन विना नापरः कोऽपि जानाति चक्रव्यूहभेदकर्म । स च व्यापृतः संशप्तक-नामक-संग्रामे । तर्हि का गतिः ? इत्थं चिन्ताकुले युधिष्ठिरे अभिमन्युर्युधिष्ठिरमुपगम्य चिन्ताकारणं जानाति स्म । ज्ञात्वा चाह — ज्येष्ठतात ! अहं चक्रव्यूहं भेत्स्यामि । अहं गर्भस्थ एव चक्रव्यूहस्य भेदोपायं पितुः

सकाशादशिक्षे । वाचमिमं श्रुत्वा नृपतिर्युधिष्ठिरः स्वस्थोऽभवत् । किन्तु तस्य चित्तमभिमन्योरमङ्गलाशङ्कया अन्तरा अन्तरा कम्पितुमारेभे । तथापि न कापुरुषत्वं परन्तु वीरत्वमेव क्षात्रधर्म इति मत्वा तदाशङ्कातः प्रतिनिवृत्तः । अथ तत्रभवान् अभिमन्युं चक्रव्यूहसंग्रामे सेनापतिपदे स्थापितवान् ।

(a) कस्य युद्धस्य विषये अयं कथांशः ? कुत्रेदं युद्धं संघटितम् ?

(b) कीदृशो बलविन्यासोऽत्र वर्णितः ? केन स निर्मितः । किं वा तस्य फलमत्रोक्तम् ?

(c) अर्जुनः कतमः पाण्डवः ? स कुत्र व्यापृतः ? तस्य किं विशेषज्ञानमासीत् ?

(d) कोऽभिमन्युः ? स कस्मिन् विषये स्वकीयं ज्ञानं कस्मै निवेदितवान् ? कथं स इदं प्राप्तवान् ?

(e) कति पाण्डवपक्षीया अस्मिन् ग्रन्थांशे उल्लिखिताः ? कोऽत्र ज्येष्ठः ? किं तस्य चिन्ताकारणम् ?

(f) क्षात्रधर्म-पदं व्याख्याय, तद्विषये अत्र यदुक्तं तदुल्लेख्यम् ।